उमाकान्तशुक्लः

# SEARCHLIGHT

# On Research and its Methodology

[illegible]

## परोष्टिदर्शनम्

एकस्य दिवसस्येयं तन्वी मे रचना नवा ।
अङ्कादङ्कं प्ररोहन्ती लालिता स्याज्जने जने ॥

# परीष्टिदर्शनम्

अनुसन्धानप्रक्रियायाः सूत्रात्मकं स्वोपज्ञप्रियम्वदाख्यविवृति-
समन्वितञ्च दर्शनम्

रचनाकारः

**उमाकान्तशुक्लः**

संस्कृतविभागे प्रवक्ता

सनातनधर्मकालेजः, मुजफ्फरनगरम् (उ० प्र०)

प्रकाशकः

**सुधाकमल-ग्रन्थालयः, मुजफ्फरनगरम् (उ० प्र०)**

PARĪSTIDAR'SANAM

BY 'SUKLA UMĀKĀNTA
EDITION 1978

Price 10/=

© UMĀKĀNTA 'SUKLA

Published by
Sudhakamal Granthalaya
MUZAFFAR NAGAR (U. P.)

Printed by
Sarvodaya Press, Meerut (U. P.)

# नुतिः

अथास्यां परीष्टिदर्शनप्रकाशनवेलायां सुव्रतरमाराध्यानामङ्गुलिगणनागणनेयानां सौहृदय्यनिधानानां विशेषज्ञानां निशितधियां सुधियां विकचत्पुण्डरीकनिभामकलुषविशदामार्जवैकपरिचयां, ज्ञानलवदुर्विदग्धानामनल्पजल्पाकानामसूयाकल्माषितां विद्रुमभङ्गपाटलपटुकान्तिमतीं, धराधरमप्यधरीकुर्वताञ्जडिम्नाऽज्ञानाञ्च धीरेतरां दृष्टिं नत्वाऽभिनवामवतारयामि नवनवोन्मेषशालिनीं सरस्वतीनटीं प्रसादयितुं सर्वानप्यात्मीयानात्मीयान् ।

अथापि चेत्केचनोद्दण्डबुद्धिबला त्रिद्वदभटा मयि प्रखरं कटाक्षखड्गमुत्कोशयेयुरुच्छेदनचातुरीचतुराः समन्ताद्व्यूहरचनामापादयेयुर्दोषैकपक्षपातिनो वा केचन स्वजनगोष्ठीषु दोषराशिमेव कर्णान्ते जपेयुरपहस्तयेयुर्वा मे दर्शनमिति नो खलु चिन्तया चुम्बितोऽस्मि । यत्कथापयति संस्कृता जननी तत्कथयामि । अनेन परीष्टिदर्शनेन नैव केचनाधिक्षिप्ता न चाप्यपहसिता इति तु विदाङ्कुर्वन्तु साक्षात्कृतसारस्वतसाराः ।

संस्कृतैकजीवनैराराध्यचरणैः साहित्याचार्यैः सांख्ययोगाचार्यैर्डाक्टर—रमेशचन्द्रशुक्लैः कृपया परमया प्रकाशितो यो विचारः परीष्टिदर्शनं निरीक्ष्य तमत्र विन्यस्य गौरवास्पदमात्मानं सम्भावयामि । ममाग्रजैः साहित्याचार्यबरेलीकालेजे संस्कृतविभागाध्यक्षैर्डाक्टर—कृष्णकान्तशुक्लैरस्य हिन्द्यामनुवादं कृत्वा सुपरिष्कृतो बहूनामध्ययनपन्था इति कृतज्ञतामावहामि । प्रकाशकञ्चास्य सुधाकमलग्रन्थालयमभिनन्दनपदैः संवर्धयामि । इति ।

विद्वच्चरणरेणुचन्दनचर्चितोत्तमाङ्गः

शुक्लोपाह्व उमाकान्तः

# शुद्धिपत्रकम्

| पृष्ठाङ्काः | पंक्तिः | अशुद्धिः | शुद्धिः |
|---|---|---|---|
| १७ | १५ | निर्देशकस्य | परीक्षकस्य |
| १७ | २२ | ०यता चिन्तितिः | ०यताचिन्तितिः |
| २४ | १६ | विंशत्युत्तर० | पञ्चविंशत्युत्तर० |
| २५ | १६ | स्तनाभ्यां | ऽस्तनाभ्यां |
| २६ | १६ | तदेमहंयुः | तदेवमहंयुः |

# परीष्टिदर्शने मम विचारः

## डॉ० रमेशचन्द्रशुक्लः

त्रिविधस्यापि दुःखस्यैकान्तिकतयात्यन्तिकतया च निराकरणार्थं यत्र साधन-मार्गाः प्रदर्श्यंते; आत्मनः प्रकृतेरीश्वरस्य च यत्र विवेचनं प्राप्यते; अस्य सर्वतो दृश्यमानस्य संसारस्य सत्यं स्वरूपं किम्? तदुत्पत्तिः कस्माज्जाता? तत्सृष्टेः किं कारणम्? तदस्ति चेतनं वा अचेतनमित्येतदादिकञ्च यत्र निरूप्यते तद् 'दर्शनम्' इति प्रोच्यते। परमेतस्यां 'परीष्टिदर्शनम्' इत्येतदाख्यायां श्री प्रो० उमाकान्तशुक्ल-साहित्याचार्यकृतायां रचनायां दर्शनपदस्य प्रयोगो नाभिहितेऽर्थे कृतोऽस्ति।

मानवस्य हृदयमस्ति पूतानां श्रद्धानां बहुलानां विश्वासानामनेकविधानां विचाराणां, कमनीयानाञ्च कल्पनानामनवधिः शेवधिः। सः कमपि लौकिक-मलौकिकं वा विषयमधिकृत्य प्रायेण स्वकीयान् विचारानुद्भावयन् वीक्ष्यते; सः क्वापि श्रद्धां निदधद् विश्वासञ्च पोषयन्नवाप्यते, लभ्यते च सः कुत्रापि त्रिविधाः कल्पनाः कुर्वाणः। कस्मिन्नपि अर्थे तत्त्वे विषये वा तद्विहितं भव्यं पाण्डित्यपेशलमुद्भावनं यत्र परिस्पन्दते तदपि 'दर्शनम्' इति कथ्यते।

प्रतिमानवस्य नैजमेव दर्शनं भवति। प्रकृतेर्मतेर्मनसो रुचेश्च विचित्रत्वान्नाना-नाविधत्वाच्च मानवस्तदनुसारेण कमपि पदार्थं पश्यति, विविनक्ति च। अतः जगति सर्वेषामपि मानवानां दर्शनं नैजमेव भवतीत्येतदप्यद्यत्वे निगद्यते। एतादृश्या विशिष्टतयालङ्कृतापि रचना दर्शनमिति व्याह्रियते। आचार्यशुक्लेनैतादृश एव कस्मिंश्चिदर्थे दर्शनपदं प्रयुक्तमिति प्रतीयते। परमेषोद्भावितापि प्रतीतिर्न भृशं मनः प्रीणयति। भारतीयैर्विद्वद्धौरेयैर्ज्ञानवद्भिस्तु दुःखनिवृत्त्यर्थं दर्शना-

नि प्रणीतानि । इदं परीष्टिदर्शनमपि समुल्लसितज्ञानेन विद्वद्वरेण दुःखनिराकरणप्रयोजनेन विरचितमिति मन्ये ।

भारते दर्शनशास्त्रं लोकप्रियम् । तत्र भारतीयानां कोविदानां मनो नितरां रमते । तेषां मनीषा अतितरां तत्र प्रीयते । अस्मद्देशे धर्मदर्शनयोस्तत्त्वज्ञानजीवनयोश्च मध्ये गम्भीरः सान्द्रतरश्च सम्बन्धो मतः । भारतीयस्य धर्मस्यास्त्याधारो दर्शनसुचिन्दिताध्यात्मिकरथ्यम् । भारतीयायाः संस्कृतेः काङ्क्षेयं महती यन्मानवस्य दर्शनं (ज्ञानम्) धार्मिकाचारचारु दृष्टं स्यात् । तन्मतेन धर्मः स्वकीयां सत्तां तदैव निधातुमर्हति यदा स दर्शनेन पुष्टो भवति ।-विद्वाँल्लेखकोऽनेन स्वकीयेन परीष्टिदर्शनेन तेषामाचारमवदाततमं द्रष्टुमभिलषते ये महाविद्यालयेषु विश्वविद्यालयेषु शिक्षकस्य गौरवपूर्णं स्थानमध्यासते किञ्च ये सरस्वतीमन्दिरभूतोच्चतमशिक्षासंस्थासु कार्यं कर्तुं सन्ति परमोत्सुक्यवन्तः-। कालेज-विश्वविद्यालयेषु शिक्षकपदावाप्त्यर्थं भूयांसो विद्वांसोऽध्यापकाश्च पी-एच्० डी० किञ्च डी० लिट् भवितुं सन्ति गुरुतरप्रयत्नवन्तः । ज्ञानार्जनं वा ज्ञानवर्द्धनं वा न तेषामिष्टमिष्टन्तु तदीयमिदं यद् येन केनापि प्रकारेण पी-एच्०डी० प्रभृतिपदोपलब्धिः स्याद् येनोच्चतमासु शिक्षासंस्थासु पदमध्यापकीयमधिगम्य प्रभूतधनलाभो भवेत् । एतदर्थं तेऽसन्मार्गे प्रवर्तन्ते । अवलम्बन्ते च बहून्यनौचित्यपूर्णानि कार्याणि । तेऽनेके लेखककृतग्रन्थस्यास्याचारपादात् स्फुटतयैव स्वकार्यसिद्धयर्थं के के उपाया वा कानि कानि साधनानि अन्वेषणपरायणा महाविद्वन्मूर्धन्या बुभूषवः संश्रयन्तीति ज्ञायते । अनुसन्धित्सवो हि सम्प्रति पूर्वेषां मूलपाटने स्वचक्रे स्थितानां च सिद्धान्तानां समर्थने, प्रसिद्धानां सिद्धान्तानामुच्छेदनेऽन्येषु चानेकासत्कार्यावलम्बनेषु व्यापृता अवाप्यन्ते इत्येतदादिकं वर्णयन् विपश्चिद्वरेण्यो दृश्यते—

१. परीष्टिपूर्तौ परीक्षकानुसन्धानम् । १०/३

२. तत्रात्मीयताचिन्तितिः । ११/३

३. मौखिकपरीक्षायां स्मितोदारवचनम् । १३/३

इत्येतेभ्यः सूत्रेभ्योऽनेकेभ्यो ग्रन्थकारोऽस्माकं पुर इदानीन्तनानां शोधार्थिनां यच्चित्रं निदधाति तद् दृष्ट्वा चित्तं दूयते शिरश्च ह्रिया नतं जायते ।

इमे हि शोधार्थिनो नैतिकचरित्रपतनपल्वले निपात्यात्मानमाश्रित्य च बहूनि कुटिलताकैतवादिपरिपूर्णान्युपादानानि यदा स्वकीयेऽभीप्सिते सफलतामश्नुवते तदा 'वयं स्मोऽगाधविद्वत्ताविभूषिता नानाशास्त्रपारावारीणा विपश्चिदग्रेसराः; न वयमिव केऽप्यन्ये' इत्येतदुच्चैर्घोषयितुं सभाः कारयन्ति, समाचारपत्रेषु सचित्रं नैजं परिचयं प्रकाशयन्ति, अन्यांश्च तांस्तानध्वनोऽवलम्बन्ते ते, येन तेषा-मुत्कृष्टतमत्वं प्रकटीभवेत् तेषामहङ्कृतिश्च तृप्तिं प्राप्नुयात्—इत्येतदादिकं प्रतिपाद्य विद्यमानेऽनेहसि महाविद्यालयादिषु भूयांस ईदृशा एव डॉक्टरा उप-लभ्यन्ते इति व्यक्तीकर्तुं कैवल्यपादे 'साफल्ये व्यपदेशात्पूर्वमुपाधिसमायोजनम्' (१/४) इत्येतदादीनि सूत्राण्यवतारयति शिक्षाजगत्समागततत्तद्दोषदुःख-दूयमानमानसो विद्वाँल्लेखकः—

१. निर्देशकत्वम् । ५/४

२. स्वान्तेवास्यनुसन्धित्सुशोषणम् । ६/४

३. ततो धनप्रस्तावः । ७/४

४. धनजीकरणम् । ९/४

इत्येतदादीनि सूत्राणि एकतस्तु चित्तं विनोदयन्त्येकतश्च तानि तत्र (चित्ते) महतीं ग्लानिं-खिन्नतां त्रपाञ्च समुत्पादयन्ति । हा ! कीदृशं पतनमस्मदीयं सञ्जातमस्तीति पुनः पुनश्चेतो वक्तुमारभते ।

आधुनिकथा एतस्या दुःस्थितेर्दर्शनार्थं दर्शनशास्त्राङ्गीकृतेयं सूत्रपद्धतिः, प्रधीप्रवरस्याद्भुतं लेखनपाटवं, वस्तुस्थितेः प्रस्तुतीकरणार्थमियञ्च विनोदप्रदा सरणिर्नूनं नितरामभिवन्दनीयाभिनन्दनीया च ।

दुःखनिराकृतिमुद्दिश्य ग्रन्थोऽयं रचित इत्युपरि प्रोक्तम् । तत्र वक्ष्यमाण-

मुदीरणमपेक्ष्यते । ग्रन्थस्यास्य मुख्यमुद्देश्यमिदं वर्तते यत् सारस्वतेष्वधिष्ठानेषु येऽध्यापनविषयकं श्रेष्ठं परममहिममञ्जुलं पावनं कृत्यमनुतिष्ठन्ति वा तत्र तदनुष्ठातुं प्रयत्नवन्तः सन्ति तेषामाचारेणावदाततरेण तेषाञ्च चरित्रेणानवद्यतरेण भाव्यं; राष्ट्र-निर्माणकर्तारः श्रेष्ठं राष्ट्रं निर्मातुं क्षमाः स्युर्येन ते स्वकीयं राष्ट्रं सर्वेषामपि राष्ट्राणामभिवन्दनीयं कर्तुमर्हेयुः । आचारावदातता चारित्रानवद्यता च त्रिविधानामपिदुःखानां ध्वंसने क्षमा भवति । तदेवं दर्शनान्तरमिवेदं परीष्टिदर्शनमपि दुःखान्यपनयति निहन्ति च । अतः ग्रन्थोऽयं दर्शनमित्येतन्नाम स्वकीयमन्वर्थीकुरुते । एतस्य ग्रन्थस्य निर्माणं स्वकीये मूले तां पावनविचारतरङ्गततिं परिपुष्णाति या विद्वत्तां (विद्वद्वताम्) सदाचार–(धर्म) परिपूतां विलोकयितुमाकाङ्क्षति । इत्थं भारतस्य शिक्षाजगती सर्वथैवोत्कृष्टतरसदाचारसुशोभितज्ञानभाविभासिता भवेदित्येषा हि शुभकामना ग्रन्थकर्तुः सिद्ध्यति ।

मम विचारेण रचनेयं संस्कृतरचनास्वभूतपूर्वैव रचना । अस्ति कृतेर्वस्तु स्पृहणीयं, भाषा समुज्ज्वला, अभिव्यक्तिर्मनोज्ञा, विषयप्रतिपादनरीतिश्चानुकरणीया । सूत्रकारेण स्वयमेव सूत्राणां प्रियम्वदाऽऽख्या व्याख्या कृतास्त्यतस्तत्तत्सूत्रस्यार्थः समीचीनतया स्पष्टो भवति । व्याख्यया च व्याख्यातुर्व्याख्याविशारदत्वमनायासेनैव विदितं जायते ।

—: ० :—

# परीष्टिदर्शनम्

ॐ नमः षड्रूपाय सव्यङ्ग्याय हास्यदेवाय सपरिच्छदाय ।

# अथ

# परीष्टिदर्शनम् ।

स्वोपज्ञप्रियम्वदाख्यविवृतिसमन्वितम् ।

तत्र

## प्रथमः सिद्धान्तपादः ।

---

**अथ परीष्ट्यनुशासनम् ॥१॥**

* प्रियम्वदाविवृतिः *

वामाङ्गे व्यञ्जना यस्य दक्षिणाङ्गे च लक्षणा ।
षड्रूपाय नमस्तस्मै हास्यदेवाय सम्मुदा ॥१॥
विज्ञानतिमिरान्धस्याज्ञानाञ्जनशलाकया ।
चक्षुर्निमीलितं येन तस्मै श्रीगुरवे नमः ॥२॥

अथेत्ययमधिकारार्थो मङ्गलार्थश्च । परीष्ट्यनुशासनं शास्त्रमाशास्त्रपरिसमाप्तेरधिकृतं वेदितव्यम् । परीष्टिः । पर्युपसर्गपूर्वादिष्धातोः

त्तिन् । पर्येषणा परीष्टिश्चान्वेषणा च गवेषणेति कोषाधिकृतोऽस्वप्न-कण्ठीरवः। गह्वरी तु परीष्टिः परिचर्यायां प्राकाम्येऽन्वेषणे स्त्रियामित्याह । अर्वाचीनास्तु शोध इति । अनुसन्धानमिति च । रिसर्चेत्याङ्ग्लभाषायाम् । सा च ज्ञानस्य कृत्स्नम् । ज्ञानं तु सदसद्भ्यामनिर्वचनीयं यत्किञ्चिदित्येवंरूपम् । परीष्टेरनुसन्धानस्यानुशासनं परीष्टचनुशासनम् । अनेन सूत्रेणास्य शास्त्रस्य सम्बन्धाभिधेयप्रयोजनान्याख्यायन्ते । सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते । शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ।। इति । प्रयोजनं विना मन्दोऽपि न प्रवर्तते ।। इति चाभिरूपाः । तत्र परीष्टिरभिधेयम् । अहङ्कृतिसन्धुक्षणं तत्फलम् । तत्फलञ्च ज्ञानोच्छेदः । अभिधेयस्य तत्फलस्य तत्फलस्य च ज्ञानोच्छेदस्य साध्यसाधनभावः सम्बन्धः ।।१।।

**पिष्टपेषणं परीष्टिः ।।२।।**

अन्येन पिष्टस्य विषयस्यानुसन्धित्सुना कृतं स्वकर्तृकं पेषणं परीष्टिः । एतेनान्यद्वारेणान्वेषितपदार्थस्यान्यानुसन्धातृमुद्रया संयोजनमिति फलितम् । अतश्च मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति तद्गतिरित्यादीनि वाक्यानि सङ्गच्छन्ते ।।२।।

**चर्वितचर्वणमित्येके ।।३।।**

अनुसन्धात्रा स्वात्मना चर्वितस्य विषयस्य पुनश्चर्वणं वा परीष्टिरित्येक आचार्याः । एवंविधा परीष्टी रोमन्थपरीष्टिरिति कथ्यते । तत्र यथा रोमन्थाभ्यासे चर्वितस्य तृणादेश्चर्वणमानन्दाय सम्पद्यते समजे तथैव स्वात्मना प्रतिष्ठापितस्य सिद्धान्तसामान्यस्य पुनः पुनर्लाला-

बहुलं विषयस्य चर्वणमानन्दायानुसन्धातृसमाजे । एतादृशं तु चर्वणं परेषामुद्वेजनार्थम् । रोमन्थपरीष्टिपरीता हि ज्ञानिनः सर्वास्वपि शोधगोष्ठीषु सर्वेष्वपि चानुसन्धानपत्रेषु विषयमेकमेव नवीकृत्य प्रस्तुवन्ति । एकमेव शोधग्रन्थं विविधं विन्यस्य पुस्तकानां पञ्चशतीं प्रकाशयन्ति । इयञ्च परीष्टिरनन्तरोक्तायाः परीष्टेर्वरतरेति **पाणिवादाः** ॥३॥

**परातिसन्धानं वेत्यन्ये ॥४॥**

अनन्तरोक्तयोः सूत्रयोः सम्बन्धस्तादृशानुसन्धानेन यत्र शोधार्थिना स्वयमेव परिश्रमः कृतः । इदं सूत्रं तु तादृशस्यानुसन्धानस्य संग्रहाय यत्रान्यैः शोधप्रबन्धो लेख्यते । लेखकाय च किञ्चिद्धनं दीयते । अत्र तु परीष्टिनिष्णाता मम्मटोक्तमर्थंकृत इति राद्धान्तं मण्डयन्तो दूषयन्ति । शोषणञ्चास्याः परीष्टेर्मूलम् । शोषणन्तु द्विविधम् । अर्थशोषणं ज्ञानशोषणञ्च । पञ्चसहस्रमितार्थस्थाने द्विसहस्रमितार्थदानादर्थशोषणम् । अन्येनार्जिते ज्ञाने स्वनामाङ्कटङ्कणाज्ज्ञानशोषणम् । शोषणञ्चावश्यकतामूलम् । शोष्याश्च प्रियदर्शनाः । शोष्या च प्रियदर्शना चेति **राजा** । ते हि जीविकाभावे शोषणं सहन्ते । परातिसन्धानं विद्येति **कालिदास**-युगे कश्चित् सम्प्रदायः । परातिसन्धानं परवञ्चनम् । इदन्त्वसद्गुरोरसत्सम्प्रदायात् कुत्सिते दिनेऽमङ्गलपूर्वकमध्यायनिवृत्तिपूर्वकमनियतात्मभिरधीयते न तु शिक्ष्यते । तच्च समीहितमप्यासीत् **कस्यचित्** । तथाहि—परातिसन्धानमधीयते यैर्विद्येति ते सन्तु किलाप्तवाचः ॥ इति । किलेत्यनुनयार्थे । किलशब्दस्तु वार्तायां सम्भाव्यानुनयार्थयोरिति **संसारः** ॥४॥

**प्रत्यक्षाप्तवाक्ये प्रमाणे ॥५॥**

प्रमाणाद्धि प्रमेयसिद्धिः । विसंवादिज्ञानं प्रमाणमिति प्रमाणसामान्य-लक्षणम् । एतद्विरुद्धं तु प्रमाणाभास इति **तैर्थिकम्मन्याः** । तत्र प्रमाण-मिति लक्ष्यम् । विसंवादिज्ञानमिति लक्षणम् । विसंवादीति संवादि-वारणाय । ज्ञानमित्यज्ञानवारणाय । शोधसन्दर्भे लक्षणस्य लक्षणन्तु यथाऽव्याप्त्यतिव्याप्त्यसम्भवगुणत्रयसंवलितत्वमिति । अधिकं तु विस्तरभयान्न लिख्यते ॥५॥

**इन्द्रियद्वारेण बाह्यवस्तूपरागाच्चित्तस्य तद्विषयसामान्यविशेषा-त्मनोऽर्थस्य निर्विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षम् ॥६॥**

उद्दिष्टं प्रत्यक्षं लक्षयतीन्द्रियद्वारेणेत्यादिना । एतच्च प्रत्यक्षमनु-सन्धान आवश्यकम् । परीक्षितस्य वस्तुनो महत्त्वरक्षार्थत्वात् । परीक्षक-समयसौविध्यार्थत्वात् । परीक्षार्थिपरीष्टिसाफल्यार्थत्वाच्च ॥६॥

**आप्तस्त्वाजन्मनः शिक्षितशाठ्यः ॥७॥**

आप्तवाक्येति घटकस्याप्तस्य लक्षणं क्रियत आप्तस्त्वेत्यादिना । जन्मन आरभ्य स्वेनान्येन वा यः शाठ्यं धौर्त्यं शिक्षितोऽसावाप्तः । तद्वैपरीत्ये **मुनेर्विमतिः** । तथा हि—आजन्मनः शाठ्यमशिक्षितो यस्त-स्याप्रमाणं वचनं जनस्य । इति । तदन्वयस्तु यो जन आजन्मनः शाठ्य-मशिक्षितस्तस्य जनस्य वचनमप्रमाणमिति । यस्य च वचनमप्रमाणं कथमसावाप्त इति सर्वमपि सुश्लिष्टम् । वाक्यस्य लक्षणन्तु तृतीय-पादस्य परीष्टिपूर्तौ परीक्षकानुसन्धानमिति (९/३) सूत्रस्य वृत्तौ करि-

ष्यते । प्रत्यक्षमित्याप्तवाक्यमिति चैतद्द्वे अपि प्रमाणे सुस्पष्टतासंवाहके । ननु च किमित्येते एव प्रमाणे तदतिरिक्तानामत्रैवान्तर्भावान्निरर्थकत्वाच्च । तथाहि—नानुमानम् । अनुसन्धानप्रक्रियायां तदनुपयोगात् । नोपमानम् । तस्याप्तवाक्येऽन्तर्भावात् । न चार्थापत्तिः । तस्या अनुमानेऽन्तर्भावात् । अनुमानस्य चानुपयोगित्वात् । अभावस्तु प्रत्यक्षान्तेवासीति तदन्तर्गतः । सम्भवस्यार्थापत्तिनिर्विशेषा गतिः । ऐतिह्यस्य च प्रमाणत्वाभावः सिद्धः । सन्देहग्रस्तत्वाद्वाऽऽप्तवाक्यान्तर्भूतत्वाद् वा । इत्येवं सिद्धं प्रमाणद्वयमिति । अनुसन्धाने द्विविधं प्रमाणमिति कौमारिकेयाः । इति शिक्षितशाठ्यः । शिक्षितशाठ्यः ।।७।।

इति परीष्टिदर्शने सिद्धान्तपादो नाम प्रथमः पादः ।।१।।

---

# परीष्टिदर्शने

## द्वितीय आचारपादः ॥

---

**निर्देशकप्रणिधानात् तत्सिद्धिः ॥१॥**

परीष्टिगुरुर्निर्देशकः । तत्रेमानि सूत्राणि भवन्ति निर्देशकपराणि—(१) विनयादिभिरपरामृष्टः पुरुषविशेषो निर्देशकः, (२) तत्र पल्लवग्राहि पाण्डित्यं सर्वज्ञताबीजम्, (३) सर्वेषामपि गुरुरगौरवात्, (४) तस्य वाचको डाक्ट्साबः, (५) तज्जपस्तद्द्रवीकरणार्थम्, (६) ततः परीष्ट्यधिगमोऽन्तरायाभावश्च । इति । तस्मिन् निर्देशके यत्प्रणिधानं भक्तिविशेषस्तस्मात् तस्याः परीष्टेः सिद्धिराविर्भावो भवति । अनुसन्धात्रा तत्र सर्वथा प्रयतितव्यम् । निर्देशकस्य परीष्टिप्रक्रियायामनिवार्यत्वात् । यत्र तु डीलिडादिषु नास्त्यावश्यकत्वं निर्देशकस्य तत्र तु दूरादेवासौ परित्याज्यः । भक्तिविशेषस्तु पादस्यास्य चतुर्थसूत्रादापादपरिसमाप्तेर्ज्ञातव्यः ॥१॥

**धनपौष्कल्याद् वा ॥२॥**

तत्सिद्धिरित्यनुवर्तते । वेति विकल्पार्थः । धनस्य वित्तस्य पौष्कल्यमातिशय्यं तस्मात् तदाविर्भाव इति सूत्राक्षरार्थः । प्रथमसूत्रे बकोपासनाऽभीष्टा । न तु वास्तवः श्रद्धातिशयः । अस्मिन् सूत्रे धनस्य

सामर्थ्यं प्रदर्शितम् । एतच्च सुकुमारमतीनां विषये । किं नाम तद्वस्तु यद्धनेन न प्राप्यते । अतस्तदभिलापः सर्वेषाम् । निर्देशका अपि तदाकृष्टा धनिकस्य परीष्टिं निर्धनाय विदुषे किमपि धनं दापयित्वा प्रपूरयन्ति । अथ चास्य धनपौष्कल्यादहमहमिकया शोधपत्राणि प्राकाश्यमुपयान्ति ॥२॥

लालाटिकत्वाद्वा ॥३॥

तत्सिद्धिरित्यनुवर्तते । प्रणिधानाल्ललाटिकत्वस्य विशेषः । प्रणिधाने भक्तिविशेषो लालाटिकत्वे तु प्रयोगविशेषः । लालाटिकत्वञ्चाङ्गिकेन वाचिकेनाहार्येण सात्त्विकेन च चतुर्विधेनाप्यभिनयेन सर्वथा प्रयोजनीयम् । तच्चास्मत्प्रणीते लालाटिकदर्शनेऽन्वेषणीयम् ॥३॥

मिष्टान्नचित्रोपहारादीनि तत्साधनानि ॥४॥

तदित्यनेन परीष्टिसिद्धेः परामर्शः । तस्याः परीष्टिसिद्धेः साधनानि साधकतमानि करणानि तु कदाचिन्मिष्टान्नवितरणम् । मिष्टान्नं हि प्रबलतमं मुखमुद्रणम् । कदाचिद् वा चित्रस्य प्रदर्शनम् । चित्रस्य चलचित्रस्य । चलचित्राणि चाद्यत्वे मनोरञ्जनस्य सर्वोच्चसाधनानि । कदाचिद् वा बालकादेर्जन्मोत्सवेषु विवाहादिषु परीक्षायां साफल्यादिषु, विवाहवर्षग्रन्थ्यादिषु शाटकादीनि वस्तून्युपायनीकृत्य निर्देशकं कृपाप्रवणं कुर्यात् । अयञ्च सर्वोऽपि व्यवहारो निर्देशकपरः । द्रवितो ह्यसौ निर्देशकः कदाचित् स्वयमेव शोधग्रन्थं लिखेत्तस्यानुसन्धित्सोः । द्रवीकरणमित्यङ्गुष्ठस्थापकः ॥४॥

बालकेभ्यो मिष्टान्नम् ॥५॥

परीष्टिसाधनेषु प्रथमतया पठितस्य मिष्टान्नस्य विनियोगं प्रदर्श-

यति बालकेभ्य इत्यादिना। प्रथमसूत्रात् सविभक्तिकस्य निर्देशकपदस्यानुवृत्तिः। निर्देशकस्य बालकेभ्यो मिष्टान्नमित्यर्थावगतिः। बालका हि मधुरप्रियाः। परीष्टिसम्पृक्तेन जनेन सर्वदैव स्वगुप्तिकायां टाफीतिनामधेयानि मिष्टान्नानि प्रायशो गोपनीयानि। टाफीतिमिष्टान्नं प्राणपणेनाप्यभिलषन्ति साम्प्रतिका बालकाः। न च तत्राधिकस्य धनस्य व्ययः। इत्यनुसन्धातुः स्वल्पेनैव मोक्षः। यदि हि निर्देशकस्य सूनुः सुता वा सम्मुखमापतेत् तदा दूराद्धूते चेति पाणिनीयं सूत्रं स्मारं स्मारं टेरंशं प्लुतीकृत्य मसृणया वाचा तद् दद्यात्। अयञ्चाभिनयो निर्देशकस्य समक्ष एव यदि भवेत् तदा महते फलाय। अस्माभिर्ह्योऽपि प्रदत्तानि तुभ्यं टाफीतिमिष्टान्नानि। यद्युपद्रवं न विधास्यसि तदा श्वोऽपि दाता। त्वं साधुर्नपुनरसाविति कृत्वाऽद्य तुभ्यमेव दीयत इत्यवसरेऽवसरे सङ्कीर्तनपुरस्सरं किमपि मिष्टान्नं दद्यात्। न दत्त्वा परिकीर्तयेदिति तु न समीचीनम्। विशेषतस्तु शोधसन्दर्भे। अधिकं तु स्वामिनस्तुष्टये बालानुलालनमिति राजनीतिसूत्रस्थे स्वामिन्यास्तुष्टये बालपूजनमिति चापत्सूत्रस्थे वृत्तिभागे द्रष्टव्यम्। सर्वोऽप्यसौ व्यवहारोऽत्रापि सुसङ्गतः परीष्टेः राजनीतिसम्मितत्वादापत्स्थितितुल्यत्वाच्च ॥५॥

## परिवाराय चित्रप्रदर्शनम् ॥६॥

साम्प्रतं महिलानाञ्चित्रदर्शने प्रभूततमोऽभिनिवेशः। न चेदं चित्रदर्शनमुत्तररामचरितस्थं ग्राह्यं प्रत्युत चलचित्रनाम्ना प्रसिद्धं सहृदयसमाजे। अनुसन्धित्सुनाऽनुसन्धात्रा वा चलचित्रस्य साहित्यिकमुताहो सामाजिकमथवा धार्मिकं राजनीतिकं वा महत्त्वमुद्भाव्य

निर्देशकस्य भट्टिनी तदवलोकनार्थं चोदनीया। साऽपि प्रसन्ने वदने-ऽधररञ्जनं ग्रन्थस्य महत्त्वपूर्णांशे गैरिकदानमिव कृत्वा क्षौमं युगलं वा नवीनं वेषं वा विन्यस्य चटुलं गच्छति। अनुसन्धाताऽपि तस्या बालकं हस्ते गृहीत्वा मार्गं प्रबोधयन् गच्छति शनकैः। साऽप्येवं व्यतिकरे समागतं देवरादिकमुपकरोति। अस्य चानुसन्धित्सोश्चित्रप्रदर्शनसत्कारं सत्कारेणैव गृह्णाति। तत्र मध्यान्तरे शरदृतौ चायपानं सामान्येन काफीपानं च विशेषेण नैव विस्मरणीयम्। ग्रीष्मे तु शीतं किमपि महार्घं पेयं स्यात्। मूल्यं चापि स्वयमेव देयं शोधार्थिना। मूल्यं चोच्चैः पृच्छेत् विक्रेतारम्। येन स्वासनस्थिताः सर्वेऽपि निर्देशकादयः शृण्वन्तु। एतेन व्ययीकृतं धनं सुस्पष्टं भवति ॥६॥

## परिजनायोपहारदानम् ॥७॥

कदाचिद् बालकैः प्रेरिताः कदाचिद् वा जायया प्रेरिताः कदाचिद् वा परिजनैः प्रेरिता अपि निर्देशकाः परीष्टिगुरवः शोधकर्मणि साहाय्यं सम्पादयेयुरिति सर्वत्र प्रयत्नवता सताऽनुसन्धित्सुना निदिध्यासितव्यम्। परिजनाः स्वामिनं वस्त्रादिकं प्रायशो याचन्ते। एवंविधकालापेक्षिता नेत्राञ्चलैरञ्चनीया। द्रुततरमेव स्वकीयं वस्त्रादिकं नैतन्ममोपयोगि चिरराम्नाय धृतमधुना न रोचते मह्यमित्यादिवचःप्रवृत्तिं प्रयोज्य तस्मै परिजनाय दीयताम्। एतेन निर्देशकस्य मोक्षः परिजनस्य तुष्टिरनुसन्धित्सोश्च श्रद्धातिशयः सुसम्पन्नः स्यात्। अनुसन्धित्सोश्च श्रद्धा प्रदर्शनपरैवापेक्ष्यते न तु वास्तविकी। सर्वत्रापि प्रदर्शनस्य विनियोग इति नारिकेलाक्षिमतसम्मतत्वादश्रद्धया सर्वमिति (६/२) वक्ष्यमाणत्वाच्च ॥७॥

सामयिकं वा सर्वम् ॥८॥

समयः प्राप्तोऽस्येति सामयिकम् । समयस्तदस्य प्राप्तमिति ठञ् । समयोचितमिति तदर्थः । निजधर्मविरोधेन योऽपि सामयिको भवेत् । सोऽपि यत्नेन संरक्ष्यो धर्मः शोधकृतश्च यः ॥ इति याज्ञवल्क्यकल्कः । समयास्तु स्वयमेवोह्याः । दिङ्मात्रं त्वत्र प्रदर्श्यते । तथाहि—रविवासरे गृहशुद्धिः । मलिनानां वस्त्राणां संशोधनम् । रजनीमुखे विष्टरपरीक्षा । भोजनवेलायां जलादिसम्प्रदानम् । आपणाच्छाकाद्यानयनम् । शिशुवर्गस्य मेलापकप्रदर्शनादिना मनोरञ्जनम् । सभासु करचरणवन्दनम् । ज्वरादौ पाणिपादसंवाहनम् । सर्वत्रापि निर्देशकस्येति योजनीयम् । एवमेवान्येऽपि समयाः परीष्टिपतितेन स्वयमेव मृग्याः । तद्विशेषास्त्वस्मद्विरचितायाञ्चाटुकाराचारसंहितायां विलोकनीयाः ॥ ॥८॥

अश्रद्धया सर्वम् ॥९॥

अत्र चाचारपादे प्रोक्तानां सूत्राणां यथासङ्गत्यभिप्रायोऽश्रद्धापरः । नैव कदाचिदपि परमार्थतो यथोक्तं विधेलिमं परीष्टिपरीतेन । यद्ययं याथातथ्येनैव कुर्यात् तदा तु भक्षयेयुरेनं निर्देशकवृका इत्यश्रद्धायाः प्राधान्यमावश्यकम् । इत्यश्रद्धया सर्वम् । सर्वम् ॥९॥

इति परीष्टिदर्शने आचारपादो नाम द्वितीयोऽध्यायः ॥२॥

---

# परीष्टिदर्शने

## तृतीयः प्रयोगपादः ॥

उच्छेदस्थापनाभ्यां तत्प्राप्तिः ॥१॥

तस्याः परीष्टेः प्राप्तिरुच्छेदेन स्थापनेन च। तत्रोच्छेद उत्पाटनम्। समूलोत्पाटनमिति यावत्। स्थापनं स्थापना प्रतिष्ठा। अद्यावधि रूढानां सिद्धान्तानां रूढिवाद एष इत्युपेक्षावलम्बनेनोत्पाटनमनुसन्धानस्य जीवातुः। साहसिकत्वं चानुसन्धित्सोः प्रवर्धते। उत्पाटनाच्च व्ययीभावस्तेन च व्यये कृते वर्धत एव नित्यमित्यपि सङ्गच्छते। स्वनिर्देशकस्य तन्मित्राणां तदनुयायिनां सति सम्भवे तत्पुत्रपौत्राणां तच्छ्यालानां तत्सम्बन्धिनां च सिद्धान्तानां समर्थनं स्थापनं च कुर्यादहर्निशम्। इयं च नवीनतमा दृष्टिरनुसन्धानस्य। तदाह महोत्कटो विद्याविरोधी—शोधार्थिना सदा कार्यं पूर्वेषां मूलपाटनम्। स्वचक्रे संस्थितानां च सिद्धान्तानां समर्थनम्॥ इति। पूर्वेऽपि चाचार्या इत्यस्मदुपाध्याया इत्यादिभिरमुमेवार्थमपुष्यन्॥१॥

## रूढानामुच्छेदः ॥२॥

रूढानां प्रसिद्धानां सिद्धान्तानामुच्छेदो नवीनताया बीजम्। नवीनता चानुसन्धानस्योपनिषत् परमेति कृत्वा रूढानां सिद्धान्तानां समुच्छेदे सर्वदा यतनीयम्। नन्वद्यत्वेऽनुसन्धानपरम्परावाहिनि संसारे प्रत्येकमनुसन्धानं वैदिकवाङ्मयादारभ्यते तत्कथं रूढानां समुच्छेद इति चेन्न सर्वस्याप्यस्यानुसन्धानप्रकारस्य परातिसन्धानमूलत्वात्। न हि तैरनुसन्धातृभिरवलोकिता वैदिकसंहिता। ग्रन्थान्तरपादटिप्पणीभ्यस्तूद्धृत्योद्धृत्य वेदमन्त्रा न्यस्यन्ते स्वशोधग्रन्थे। ते चासङ्गता इवावलोक्यन्त इति तदुच्छेदप्रवृत्तिर्जागर्ति। तथाचोच्छेदपन्थाः प्रशस्तो भवति। अनया परम्परयैतिह्यसंस्पर्शोऽप्यभिजायते। इतिहासमूला वृत्तिरप्यनुसन्धानेऽपेक्ष्यते साधुजनेन ॥२॥

## अरूढानां स्थापनम् ॥३॥

सम्प्रति यान्यनुसन्धानसंस्थानानि प्रचलन्ति तानि बद्धदलानि भवन्ति। सङ्घं विना न तानि जीवन्ति। सङ्घे शक्तिः कलौ युग इति निगमादेशाक्षरमौलिमालामण्डितास्तत्सदस्याः। एषु चापरिपक्वा निर्णया राजन्ते। तेषां जीवनदानमनुसन्धित्सूनां धर्मः। तदभावे राज्यसाहाय्यासम्भवात्। सर्वथा बद्धपरिकरैः सर्वैः स्वकीयानां विचारसरणिः शरणीकर्तव्येत्येव क्षोदक्षमः पन्थाः ॥३॥

## खपुष्पकृतशेखरश्चानुसन्धाता ॥४॥

अनेन सूत्रेणास्य वेषविन्यासः प्रकाश्यते। पुष्पकृतशेखरास्त्वन्येऽपि

भवन्ति । खेति संयोजनादस्य दिव्यता सूचिता भवति । अत एवासावशब्दवाच्य एवेति भावः ॥४॥

**तिस्रो गतयः ॥५॥**

तस्यानुसन्धित्सोस्तिस्रो वक्ष्यमाणा गतयो भवन्ति । एतत्सूत्रञ्चावश्यकमनुसन्धातुर्नैव कादाचित्कमपि वैयर्थ्यमिति बोधनार्थम् ॥५॥

**वन्ध्यासुतत्वं प्रथमा ॥६॥**

अनेनास्य सौभाग्यशीलस्य मातृकीर्तनमिति विज्ञायते । एवञ्च गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमा यस्य । तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी भवति ॥ इति चापि स्फुरति ॥६॥

**मृगतृष्णाम्भःस्नानं द्वितीया ॥७॥**

एतेनास्य स्नानपुरस्सरं सन्ध्योपासनादिपारवश्यं द्योतितम् । एषोऽत्र भवान् नदीमतिक्रम्य मृगतृष्णिकां संक्रान्तः स्नातक इति चास्मा उपाधिः प्रदीयते कर्मविद्भिः ॥७॥

**शशशृङ्गधनुर्धरत्वं चरमा ॥८॥**

एतेनास्य शौर्यसम्पत् प्रदर्शिता भवति ॥८॥

**न तुरीया ॥९॥**

इतः प्रागुक्ताभ्यस्तिसृभ्यो गतिभ्यो नान्या तुरीया गतिरनुसन्धातुः ।

ननु च सन्त्यनेके व्यपगतार्था अनुसन्धातारो येषां न वन्ध्यासुतत्वं न वा मृगतृष्णाम्भःस्नानं न चापि शशशृङ्गधनुर्धारित्वम् । तेषां संग्रहार्थं चतुर्थी गतिः किमिति नोक्तेति चेत् सत्यम् । वस्तुतस्तु गतित्रयाति-रिक्तो नानुसन्धाता । असौ त्वनुसन्धातृश्रेणीविमुख इति तस्यास्त्रै-विध्यमेव सुसङ्गतम् । अपि चायमनुसन्धानसम्प्रदायः । असफलाय नोपाधिर्दीयते । इति । अस्य चानुसन्धातुः सर्वासु गोष्ठीषु सर्वेषु कालेषु सर्वासु परीष्टिषु सर्वेषु च मार्गेषु स्तवनमिदम्प्रथमैरक्षरैः क्रियते—मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः । एष वन्ध्यासुतो याति खपुष्पकृतशेखरः ।। इति ।।९।।

## परीष्टिपूर्त्तौ परीक्षकानुसन्धानम् ।।१०।।

अयमत्रानुसन्धानसदाचारः । तथाहि—सोऽयमनुसन्धातानुसन्धानसमित्या स्वीकृतां रूपरेखामवलम्ब्य ग्रन्थमेकं विलिखति । ग्रन्थलेखनकाले चासौ ग्रन्थान्तरस्य साहाय्यं नीत्वा लिखति । इयमेषा लेखनप्रक्रिया । तथाहि—मूलग्रन्थस्य क्वचिच्छब्दपरिवर्तनं क्वचिद्वा वाक्यपरिवर्तनं क्वचिदपि वाच्यपरिवर्तनं क्वचिच्चानुच्छेदपरिवर्तनं क्वचिद्वाऽध्याय-परिवर्तनं कुर्यात् मौलिकतां वोढुम् । एवमसौ परीष्टिं पूरयति । विश्व-विद्यालयस्तु परीष्टेः परीक्षार्थं कदाचिद् द्वयोः परीक्षकयोः कदाचिच्च त्रयाणां परीक्षकाणां पार्श्वे ग्रन्थममुं प्रेषयति । ग्रन्थस्य लक्षणं त्व-नाम्नास्यमानविषयं महावाक्यं ग्रन्थः । इति । अनाम्नास्यमानोऽनभ्य-स्यमानः । विषयो ज्ञाप्यः । युक्तं चैतल्लक्षणम् । शोधस्य महावाक्य-रूपत्वादनाम्नास्यमानविषयत्वाच्च । महावाक्यं तु वाक्योच्चयः । वाक्यत्वन्त्वयोग्यताऽनाकाङ्क्षाऽनासत्तियुक्तपदोच्चयत्वम् । अयोग्यताया

अभावेऽनुसन्धानगतपदोच्चयस्य न वाक्यत्वमलक्षणात् । योग्यता चाऽकिञ्चित्करी सम्बद्धपदार्थस्य शोधेऽनावश्यकत्वात् । आकाङ्क्षा हि श्रोतुर्जिज्ञासारूपा । अनाकाङ्क्षा च तद्विपरीता । अनाकाङ्क्षाभावे शोधगतपदोच्चयस्य न वाक्यत्वम् । श्रोतृणां तत्र जिज्ञासाभावात् । बुद्धचविच्छेदाभावोऽनासत्तिः । एवमनासत्त्यभावेऽपि शोधगतपदोच्चयस्य न वाक्यत्वम् । बुद्धिविच्छेदस्य शोधनिकषोपलत्वात् । एवं शोधार्थिना सर्वथा प्रोक्ते सलक्षणे वाक्ये यतनीयम् । सन्ति च सहस्रशः शोधग्रन्था ये पुस्तकालयेषु पतिताः श्वासान् गणयन्ति न च कदाचिदपि प्राकाश्यमुपयान्ति । अनुसन्धाताऽपि स्वरचितं ग्रन्थं जातुचिदपि न पुनरवलोकयति पुनरुक्तिदोषाग्रहभीतत्वादभ्यासे तु विषं विद्येति च तद्विश्वासात् ।

एवंविधस्य ग्रन्थस्य परीक्षार्थं यदा परीक्षको नियुक्तः स्यात् तदा विश्वविद्यालयं गत्वा लिपिकं वशीकृत्य जलपानमूल्यं किञ्चिद् दत्त्वा धनं निर्देशकस्यावाससङ्केतं गृह्णीयात् । यश्चायं लिपिको नाम जन्तुः स तु कार्यालयस्य केन्द्रबिन्दुः । तद्वशश्च सर्वोऽपि कार्यालयव्यवहारः । तदनु कस्यचित् प्रभाववतो जनस्य पत्रं गृहीत्वा तस्य गृहं गच्छेदुपहारपाणिर्ग्रन्थलेखनोद्दीप्तशिरा जलराशिमिव परीक्षकं जडराशिम् । समित्पाणिरश्रोत्रियमब्रह्मनिष्ठमित्यादिव्यवहारात् । स च परीक्षकः सदक्षिणमुपहारं सम्प्राप्य परमया कृपया तमुपदिशति यथा प्रश्नानेतान् कण्ठाग्रान् कुर्विति ॥१०॥

तत्रात्मीयता चिन्तितिः ॥११॥

तत्र परीक्षक आत्मीयताया ममत्वस्य चिन्तितिर्विचारः परमाव-

श्यकः । यावच्च न परीक्षा सम्पद्यते तावद्विनयादिगुणानां प्रदर्शनमवश्यमेव कुर्यादित्येतदर्थमग्रिमं सूत्रमुपस्थापयति ॥११॥

### विनयेन वर्तनम् ॥१२॥

परीक्षायाः पूर्वं परीक्षाकालेऽपि च विनयेन वर्तनमावश्यकम् । परीक्षानन्तरं तु किं कुर्यादित्यप्यनेनैव सूत्रेण कथयति विनये न वर्तनमिति । विनये वर्तनं नेति विभागः ॥१२॥

### मौखिकपरीक्षायां स्मितोदारं वचनम् ॥१३॥

यतो हि सर्वोऽपि परीक्षकः परीक्षायाः पूर्वमेवावलोकित इत्यतोऽन्येषामुपरि प्रभावपातनायोत्तरदानकाले स्मितपुरस्सरमुत्तरं दातव्यम् । अनेन निर्भीकतोक्ता भवति । विषयस्य चाधिकारः । पूर्वमेव गृहीतोत्कोचश्च परीक्षकः परीक्षार्थिनं प्रशंसन्नाश्वस्ततां चास्य प्रख्याप्योत्तीर्णमेनं घोषयेत् । एतेन परीक्षकस्यापक्षपातित्वमनुसन्धातुश्च परिश्रमशीलत्वं प्रसिद्धं भवति ॥१३॥

### विषयान्तरकरणं वा ॥१४॥

कदाचित् प्रश्नस्योत्तरमविन्दन् विषयान्तरमपि कुर्यात् । गृहीतोपहारः परीक्षकस्तावत्तदनुसृतमेव प्रश्नं प्रस्तुयात् । प्रतिभाबलेन चैतच्छक्यते कर्तुम् । दिङ्मात्रमत्रोदाह्रियते । तथा हि यदि परीक्षको ग्रन्थस्य विषये प्रश्नं कुर्यात् तदा तस्य वेष्टनविषय उत्तरं दद्यात् । यदि वा शोधाय स्वीकृतप्रकारं पृच्छेत् तदा तस्यैतिह्यं विवृणुयात् । परीक्षका अप्येवंविधेषु विषयेषु भवन्त्युदाराः ॥१४॥

**पूर्वनिर्द्धारितानां प्रश्नानामुत्तरं वा ॥१५॥**

अस्य सूत्रस्य व्याख्यानं परीष्टिपूर्तौ परीक्षकानुसन्धानमित्यतोऽनुसन्धेयम् । इति पूर्वनिर्द्धारितानां प्रश्नानामुत्तरं वा । उत्तरं वा ॥१५॥

**इति परीष्टिदर्शने प्रयोगपादो नाम तृतीयः पादः ॥३॥**

# परीष्टिदर्शने

## चतुर्थः कैवल्यपादः ॥

साफल्ये व्यपदेशात्पूर्वमुपाधिसमायोजनम् ॥१॥

परीष्टिपूर्णतायां साफल्यमधिगत्यानुसन्धाता स्वनामधेयात् पूर्वं तदुपाधेः समायोजनं प्रकुर्यात् । लेखनकाले तदाद्यक्षरं विन्यसेत् । स्वपरिचयदाने सम्पूर्णमेवोपाधिं ब्रूयात् । सर्वेष्वपि प्रपत्रेषु लेखेषु पुस्तकेषु चोपाधिपुरस्सरं स्वनामाङ्कनं कुर्यादिति परीष्टिसमयः । छात्राः प्रतिबोधनीया यथा ते तद्विरुदस्यैव प्रयोगं कुर्युस्तत्कृते । छात्र-संसदि लब्धकीर्तिरसावचिरादेव सर्वत्रापि तदुपाधिसंयुक्त एव ज्ञास्यते ॥१॥

सभाकरणम् ॥२॥

साफल्य इत्यनुवर्तते । सफलोऽनुसन्धाता काँश्चन स्वजनानाहूय ब्रूयाद् भवन्तः सर्वेऽपि मम सम्मानं लक्ष्यीकृत्य सभां कुर्वन्तु । अस्यां सभायां किमपि परिहीनं नो स्यात् । अर्थसाहाय्यं सरहस्यमहमेव विधास्यामि । न तत्र भवद्भिश्चिन्ता विधातव्या । एकमभिनन्दनपत्रं कुर्वन्तु । कश्चि-

न्नेता निमन्त्र्यताम् । प्रभूता जनाः संसदि भवेयुरित्यवधानं दीयताम् । जलपानस्य व्यवस्था नो विस्मरणीया । अद्यत्वे जलपानाभावे नो समायान्ति जना उत्सवेषु । सभायाः सूचना निमन्त्रणपत्रैर्दीयताम् । आकाशवाणीतो दूरदर्शनतः समाचारसंस्थानेभ्यश्च नूनमागच्छेयुः प्रतिनिधयः । एवमियं सभा प्रारभ्यते । तत्रात्मीयः संयोजकः स्यात् । मित्राणि चारणकृत्यं सम्पादयन्ति । असावपि तत्स्तुतिभिर्भृशं तृप्यति ॥२॥

### समाचारपत्रेषु सचित्रं सूचनाप्रकाशनम् ॥३॥

समाचारपत्रमुपलक्षणं सर्वेषामेव प्रचारसाधनानाम् । तेन चाकाशवाणीयन्त्राणां दूरदर्शनमञ्जूषाणां च ग्रहणम् । समाचारपत्रेषु तस्य चित्रं यथा प्राकाश्यं गच्छेत् तथा यतनीयम् तेन स्वात्मनाऽन्तरङ्गैश्च । यस्मिंश्च दिने समाचारः प्रकाशितः स्यात् तस्मिन् दिने गाम्भीर्यगरिमाणमास्थाप्य मुखचत्त्वरे स्वहृदयस्य क्षुद्रतां न प्रकाशयेत् । यश्च कश्चिदपि सर्वतः प्रथमं सूचयेत् तस्य तमेवं पृच्छेत्—केनासौ समाचारस्तत्तत्पत्रेषु सम्प्रेषितः स्यात् ? अस्माकं चित्रं तत्र समाचारपत्रकार्यालये कथङ्कारं तिष्ठति ? एतच्चापि कथयेद् यदहमस्मादेव हेतोः परिहरामि सभादिकं यतो ह्यत्र प्रचारो भवति । नैव मया किमप्येवंविधं कार्यं कृतं यस्य प्राकाश्यं भवेत् । अस्माकं तु विश्वासो नहि कस्तूरिकामोदः शपथेन विभाव्यत इत्यत्रावतिष्ठते । इति ॥३॥

### विजयोन्मादः ॥४॥

समाचारपत्रेषु सूचनायां प्रकाशितायामसावात्मानं कमप्यलौकिकं

मन्यते । स एवोपाधिरस्माकं नामधेयात्पूर्वं संलग्नो यो नाम विश्वप्रसिद्धानां जनानां नामधेयात् पूर्वं लगति । यदा हि विश्वप्रसिद्धोऽमुकोऽनुसन्धाता साफल्यमधिगतवान् तदाऽपि तादृशी विशाला सभा न समायोजिताऽऽसीद् यादृशी ह्यस्माकं सम्माने समायोजिता । यस्मिन् समाचारपत्रे प्रधानमन्त्रिणः सपरिवारस्य चित्रं प्रकाश्यते तस्मिन्नेवास्माकमिति स्मारं स्मारं विजयोन्मादोऽस्य जागर्ति ॥४॥

## निर्देशकत्वम् ॥५॥

यावदुपाधिर्नो प्राप्यते तावदन्येषामनुसन्धाननिर्देशं नैव कर्तुमर्हति जनः ।उपाधेःप्राप्त्यनन्तरमसौ निर्देशकस्य योग्यतां बिभर्ति । क्षणेनान्य एव भवतीति स्तूयतेऽयं जनोऽनुसन्धित्सुभिरहरहः । तथाहि–तानीन्द्रियाण्यविकलानि तदेव नाम सा बुद्धिरप्रतिहता वचनं तदेव । शोधोष्मणाऽविरहितः पुरुषः स एव ह्यन्यः क्षणेन भवतीति विचित्रमेतत् ॥ इत्यादिभिः श्लोकैः । नगरस्यानेके वराका अनुसन्धित्सवोऽस्यान्तिके समुपयान्ति । असावपि कर्णं कण्डूयमानो नेत्रे निमील्य कथयति यन्मम पार्श्वे समयो नास्ति । मम पार्श्वे स्थानं नास्ति । अस्मदन्तेवासिनः कार्यकरणे धैर्यस्यावश्यकता भवतीत्यादिभिर्वचोभिः स्वमाहात्म्यं स्थापयन् प्रथमतो निषिध्य तान् विसर्जयेत् । गुप्तरूपेण च केनापि माध्यमेनार्थं गृहीत्वा कथञ्चित् तन्निर्देशकत्वमूरीकुर्यात् । स्त्रीजातीयानां तु निर्देशकत्वं ऋजुवृत्या स्वीकुर्यात् । युवतीनां निर्देशकत्वे जीवनस्य साफल्यमिति तु बहवः ॥५॥

## स्वान्तेवास्यनुसन्धित्सुशोषणम् ॥६॥

यावदपि दैनन्दिनं शोषणमनेनान्वभावि शोधकाले तत्सर्वमपि सहस्र-

कृत्वः प्रयोक्तव्यमन्तेवासिनि । एतेन लाभद्वयं भवति । स्वमनस्तोषणमित्येकः । अन्तेवासिधैर्यपरीक्षणमित्यन्यः । यावच्छोधच्छात्रस्तं परित्यज्य न पलायते तावन्मध्ये मध्ये हितोपदेशमपि दद्यात् । येनासौ वराकश्छात्रस्तत्र विश्वासं विन्यसेत् । विश्वासन्यासे किमपि क्रियताम् । परमस्मिन् कर्मणि सावधानेन भाव्यम् । यतो हि शोधमार्गे विश्वासो न गण्यते । न च वस्तुतः कश्चित् कस्मिंश्चिद् विश्वसितीति ॥६॥

**ततो धनप्रस्तावः ॥७॥**

शोधे प्रसक्तस्यान्तेवासिनः स्थितिं निभाल्य ततो धनमपि प्राप्यताम् । धनस्य साक्षात् प्रस्तावो न विधेयः कदाचिदपि । प्रकारान्तरेण तु प्रस्तूयताम् । अयमत्र दिग्निर्देशः । तथा हि—किं कथयानि साम्प्रतमस्माकं विद्यालये समये वेतनमेव न प्राप्यते । अद्य तु मासस्य दशमी तिथिर्व्यतीता न चेमे ददति वेतनमधिकारिणः । सर्वेऽप्युत्तमर्णा अस्मान् कठोरया दृष्ट्या निरीक्षन्ते । बालकानां विद्यालयशुल्कं नैव प्रहितम् । दुग्धविक्रेतुर्जिह्रेमि । समाचारपत्रग्रहणं त्यक्ष्यामि । सम्प्रति काष्ठं नास्ति । अद्य तु घृतलवणतैलतण्डुलचिन्तासन्तानवितानेन परीतोऽस्मि । का गतिः । रात्रौ निद्रां न लब्धवान् । एतत् सर्वमपि श्रुत्वा मनोरममवसरं सम्प्राप्य निर्देशकं तोषयितुमन्तेवासी मनसि हृष्यन् यत्किमपि ददाति । इत्थमेवावसरेऽवसरे ततो नेतव्यं किमपि धनम् । समये समये च तत्प्रत्यावर्तनकीर्तनं नैव विस्मरणीयम् । न च कदापि प्रत्यावर्तनीयम् ॥७॥

**प्रकाशनमृगतृष्णिका ॥८॥**

गृहीतोपाधिनाऽनेन सर्वत्रापि क्षेत्रेषु स्व-प्रभावो निपात्यताम् ।

प्रारम्भे स्थानिकेषु पत्रेषु तदनु माण्डलिकेषु स्व-विचाराणां प्रकाशनं कुर्यात् । छात्राणां कृते विविधपरीक्षाप्रवेशाय लघूनि लघूनि पुस्तकानि लिखेत् । प्रतिवादिनां तु पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीं करोमीति वरदराजप्रवृत्त्या लघुपुस्तकलेखनस्यौचित्यं प्रदर्श्य मुखमुद्रणं कुर्यात् । तन्मुखमुद्रणमस्य च पुस्तकमुद्रणमित्यहो द्वयोरेव समं योग इति चाद्भुतं विलोकयेत् । तदनु स्वशोधग्रन्थं पेटिकायां निधाय ये ये प्रकाशकाः सन्ति तेषां सर्वेषां पार्श्वे गत्वा प्रकाशनवार्तां कुर्यात् । न च विश्वासं कुर्यात् । तेऽप्यस्योत्साहं मन्दं कुर्वन्तोऽस्य मनसि स्थित्वा कथयन्ति यदस्य प्रकाशनेन नास्माकं कश्चिदपि लाभः । यदि भवन्तः प्रकाशनमूल्यस्यार्द्धमस्मभ्यं ददति तदा किमपि करिष्यामः । असावपि ग्रन्थं प्रकाशितमवलोकयितुं मूल्यस्यार्धं वितीर्य तत्प्रकाशनं प्रतीक्षते । प्रकाशकश्चास्य प्रभूतं मूल्यं करोति । प्रकाशनात्पूर्वमेव च तदनुसार्यर्द्धं मूल्यं गृहीत्वा प्रकाशने प्रवर्तते । अयमपि विलोक्य बहुमूल्यं ग्रन्थं हृष्यतितमाम् । अयं लाभांशाय चिन्तितः प्रकाशकं दिने दिने रुणद्धि । प्रकाशकः कथयति—भवतां पुरस्ताद् विकल्पद्वयं वर्तते—धनं वा नीयतां पुस्तकानां पञ्चत्रिंशतिर्वा नीयताम् । धनं तु तदा दास्यते यदा ग्रन्थस्य विक्रयो भविष्यति । इदञ्च कार्यं कालापेक्षि । अयमपि गणनां विधाय ग्रन्थस्यैकस्य पञ्चसप्ततिमितं मूल्यं पञ्चत्रिंशत्यामावृत्य विंशत्युत्तरषड्विंशतिशतं समाकलय्य ग्रन्थग्रहणविकल्पमेवाहृत्य तं नयति । ग्रन्थस्य विक्रयकार्यमप्यायसचणकचर्वणमेव । वराको विद्यालयाद् विद्यालयं गच्छति । सर्वत्रापि निष्फलो भवति तत्प्रयासः । अन्ततो निःशुल्कमेव वितरति स्वजनेषु । अनेन तु साकमस्य शोधं प्रति वितृष्णा सञ्जायते । वितृष्णा च कैवल्यहेतुः ॥८॥

## ध्वजीकरणम् ॥६॥

अयं चास्य प्रात्यहिको व्यवहारः। यथा हि केचन नेतारो राष्ट्रोत्सवेषु राष्ट्रध्वजमुत्तोलयन्ति। तस्मादप्यधिकं च नैजं महत्त्वमभिलषन्ते तस्मिन्नुत्सवे न मनस्यानयन्ति समादरं तत्कृते। तथैव तथोक्तस्वज्ञानध्वजस्योत्तोलनममुना कार्यम्। घटाटोपो भयङ्कर इति सदुक्ति परिपालयताऽनेन सर्वत्रापि घटाटोपत्वमङ्गीकरणीयम्। यदि च कश्चिद् विद्यालवदुर्विदग्धो योद्धुं समापतेत् तदा भवान् पूज्य इति कृत्वा त्वमधम इति कृत्वा त्वं च सम इति कृत्वा शास्त्रार्थं परिहरेत्। प्रसिद्धेष्वर्थेषु दोषमुद्भाव्य ध्वजीकरणं कुर्यात्। तथा हि—कालिदासस्य काव्यं सर्वथा सन्दिग्धम्। नापी कविः काव्ययोजनां जानाति। श्लोकश्चायं विपरीतमर्थं ददाति। इत्युक्त्वा तन्वीश्यामा शिखरिदशनेत्याद्युत्तरमेघीयं श्लोकं पठित्वा पुनरेवं पठेत्—

तन्वी श्यामाऽशिखरिदशनाऽपक्वबिम्बाधरोष्ठी
मध्येऽक्षामाऽचकितहरिणीप्रेक्षणाऽनिम्ननाभिः।
श्रोणीभारादलसगमनाऽस्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषयेऽसृष्टिराद्येव धातुः॥ इति।

पुनश्च सहृदयान् पृच्छेदयि भोः कासीदावश्यकता काव्यस्यैवंविधस्य। इत्थं च विविधान् मण्डलमार्गानङ्गीकृत्यात्मानमद्भुतं गुरुं जानीयात्। असूयया परगुणेषु दोषाविष्करणरूपया ह्यनुसन्धाने परमानन्दाधिगतिः॥६॥

## अहंयुः ॥१०॥

अथ परीष्टयनुशासनमित्यस्मिन् सूत्रे वृत्तौ प्रतिपादितं परीष्टेः फलं निर्दिशति । अहंयुरित्यनेन । परीष्टेः फलमहङ्कृतिसन्धुक्षणं तत्फलञ्च ज्ञानोच्छेद इत्यावेदितमेव प्राक् । कश्चिन्निर्देशकोऽभिमानित्वं निसर्गतः प्राप्नोति । कश्चित्तु न प्राप्नोति । यश्च स्वभावतो नास्त्यभिमानी तेनावश्यमेवाभिमानिना भाव्यम् । विद्या ददाति विनयमिति तु पामराणामुक्तिः । विद्या विवादायेति तु विदुषां दर्शनमिति न तेन कदापि विस्मरणीयम् । अत एवान्येषां ग्रन्थानालोक्य तुच्छः प्रयास इति भाषणं श्रुत्वा निरर्थकं वाङ्मैथुनमिति ब्रूयात् । नवीनं कमपि च्छात्रं निरीक्ष्य कस्तव गुरुरिति पृच्छेत् । ततश्चोत्तरं श्रुत्वा तन्नामधेयं चविज्ञायैकवचनमवलम्ब्यायमपि सञ्जातोऽध्यापकः । अहो आश्चर्यं स्यायं विषय इत्याख्याय पुनः पृच्छेत् पाठयत्यपि किञ्चिन्नवेति । कदाचित् कथयेत् यन्मयाऽमुष्मिन् विद्यालयेऽमुकोऽध्यापकः पराजितः । असौ तु ममैकस्यापि प्रश्नस्योत्तरं न प्रादात् । अस्य त्वक्षरस्यापि ज्ञानं नास्ति । एवमादिभिरक्षरैः स्वाभिमानं प्रकाशयन् स्वकीयज्ञानवाणिज्यमूल्यमुपबृंहयेत् । अस्यां प्रक्रियायां ज्ञानोच्छेदं च कुर्यात् । बन्धो हि सर्वदुःखकारणं तदुच्छेदस्तु कैवल्यमिति दार्शनिकदृष्टिः । यथा हि वेदान्तेऽहं ब्रह्मास्मीति बोधस्तथात्राप्यहंयुरित्येवंरूपः ॥ तदेमहंयुः । अहंयुः ॥१०॥

इति परीष्टिदर्शने कैवल्यपादो नाम चतुर्थः पादः ॥४॥

---

# परीष्टिदर्शनम्

## हिन्दी अनुवाद

सव्यङ्ग्य सपरिच्छद षड्रूप हास्यदेव को प्रणाम ।

प्रारम्भ

# परीष्टिदर्शन ।

स्वोपज्ञ प्रियम्वदा नामक विवृति से युक्त ।

उक्त दर्शन में

## प्रथम सिद्धान्तपाद ।

—०—

### परीष्टि-अनुशासन का प्रारम्भ ॥ १ ॥

प्रियम्वदा विवृति

(मङ्गलाचरण)

जिनके वामाङ्ग में व्यञ्जना (देवी) और दक्षिणाङ्ग में लक्षणा (देवी) हैं उन (स्मित, हसित, विहसित, उपहसित, अपहसित और अतिहसित नाम से प्रसिद्ध) छः रूपों वाले हास्यदेव को प्रसन्नता पूर्वक प्रणाम (निवेदन) है ॥१॥

विज्ञान रूपी तिमिरान्ध से युक्त (शिष्य) का जिन्होंने अज्ञानरूपी अञ्जन-शलाका से नेत्र (युगल) बन्द कर दिया है, उन श्रीगुरु को प्रणाम (निवेदन) है ॥२॥

(सूत्र में) 'अथ' शब्द का अर्थ है अधिकार तथा मंगल । परीष्ट्यनुशासन नामक शास्त्र इस शास्त्र की समाप्ति तक अधिकृत समझना चाहिए । परीष्टि शब्द 'परि' उपसर्गपूर्वक 'इष्' धातु से 'क्तिन्' प्रत्यय लगाकर बनता है । कोषकार अस्वप्नकण्ठीरव (अस्वप्न = अमर, कण्ठीरव = सिंह, अर्थात् अमरकोष के लेखक अमरसिंह) के अनुसार परीष्टि के पर्यायवाची शब्द हैं— पर्येषणा, अन्वेषणा और गवेषणा । गह्वरी (अर्थात् मेदिनी नामक कोष) का कहना है— परीष्टि शब्द परिचर्या, प्राकाम्य और अन्वेषणा (स्त्रीलिङ्ग) अर्थ में प्रयुक्त

होता है। अर्वाचीन विद्वान् इसे (परीष्टि को) 'शोध' तथा 'अनुसन्धान' कहते हैं। आङ्ग्ल भाषा में इसे 'रिसर्च' कहा जाता है। वह परीष्टि ज्ञान की पूर्णता या समग्रता है। (यहाँ) ज्ञान को न सत् कहा जा सकता है और न असत् 'कुछ है' यही इसका रूप है। (इस प्रकार परीष्टयनुशासन का अर्थ हुआ—) परीष्टि का = अनुसन्धान का, अनुशासन = शास्त्र। इस (प्रथम) सूत्र के द्वारा इस शास्त्र के सम्बन्ध, अभिधेय और प्रयोजनों का बखान किया गया है। विद्वानों का विचार भी है— सिद्धार्थक एवं सिद्धसम्बन्धक पदार्थ को सुनने में ही श्रोता की प्रवृत्ति होती है, अतः शास्त्र के प्रारम्भ में प्रयोजनसहित (शास्त्र का) सम्बन्ध बता देना चाहिए। प्रयोजन जाने विना तो मूर्ख भी (अध्ययन आदि कृत्य में) प्रवृत्त नहीं हुआ करता। इस 'सूत्र' का अभिधेय है— परीष्टि। उसका फल है— अभिमान का सन्धुक्षण। अभिमान सन्धुक्षण का फल है— ज्ञान का उच्छेद। अभिधेय (परीष्टि) और उसके फल (अभिमान सन्धुक्षण) का तथा अभिमान सन्धुक्षण के फल ज्ञानोच्छेद का साध्यसाधनभाव सम्बन्ध है ॥१॥

**पिष्टपेषण को परीष्टि कहते हैं ॥२॥**

